# केन्द्रीयसंस्कृतविश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्यां प्रत्यायितः

## मुक्तस्वाध्यायपीठम्

## संस्कृताध्ययनकेन्द्रम्

**(Centre for Sanskrit Learning)**

# आवासीयसंस्कृतशिक्षकप्रशिक्षणम्

केन्द्रीयसंस्कृतविश्वविद्यालयेन संस्कृतेन संस्कृतभाषाशिक्षणार्थं कुशलभाषाशिक्षकान् निर्मातुं च दीक्षापुस्तकाधारेण (प्रथमदीक्षा, द्वितीयदीक्षा) अखिलभारतस्तरे एकविंशतिदिवसीयं प्रशिक्षणं प्रदास्यते।

**प्रशिक्षणस्य उद्देश्यानि-**

- कुशलसंस्कृतभाषाशिक्षकाणां निर्माणम्।
- संस्कृतभाषाध्यापनकौशलवृद्धिः।
- सरलमानकसंस्कृतेन पाठयितुं नैपुण्यसम्पादनम्।
- आधुनिकपद्धत्या संस्कृतभाषाध्यापनाय प्रशिक्षणम्।
- संस्कृतशिक्षणे नवाचाराणां प्रयोगः।
- आधुनिकविद्यासंस्थासु अध्यापनावसरः।

**अर्हता-** स्नातकोत्तीर्णता/स्नातकोत्तरोत्तीर्णता, संस्कृतसम्भाषणशीलता, संस्कृतसम्भाषणशिबिरचालनानुभवः च।

**वयोमितिः-** 35 वर्षाणि (01.07.2024 दिनाङ्कपर्यन्तम्)

**अपेक्षितसंख्या-** 100 जनेभ्यः प्रशिक्षणं दास्यते। अर्हताद्दृष्ट्या वरीयता प्रदास्यते।

**आवेदनम्-** गुगलफार्ममाध्यमेन आवेदनपत्रं पूरणीयम्। आवेदनपत्रस्य लिंक विश्वविद्यालयस्य जालपुटे वर्तते। 20.06.2024 दिनाङ्कं यावत् आवेदनपत्रं पूरणीयम्। ईमेलमाध्यमेन पत्रालयमाध्यमेन वा आवेदनपत्रं नैव प्रेषणीयम्।

**आवेदनतिथिः-** 31.05.2024 दिनाङ्कतः 20.06.2024 दिनाङ्कं यावत्।

**लिखितपरीक्षा-** गुगलफार्ममाध्यमेन लिखितपरीक्षा स्वीकरिष्यते। लिखितपरीक्षायां शतस्य अङ्कानां पञ्चाशत् बहुविकल्पात्मकप्रश्नाः भविष्यन्ति। सर्वे प्रश्नाः समाधेयाः। परीक्षां लेखितुं सार्धैकहोरासमयः दास्यते। निश्चितसमयाभ्यन्तरे परीक्षापत्रं परीक्षार्थिना समर्पणीयम्। केनचित् कारणेन प्रश्नपत्रं न समर्पितं चेत् विश्वविद्यालयः तदर्थम् उत्तरदायी न भविष्यति।

**लिखितपरीक्षातिथिः-** 23.06.2024, रविवासरे प्रातः एकादशवादनात् सार्धद्वादशवादनं यावत्। लिखितपरीक्षापत्रस्य लिंक मेलमाध्यमेन अध्येतृभ्यः एकहोरापूर्वं प्रेषयिष्यते। लिखितपरीक्षायाः परिणामोद्घोषणं 28.06.2024 तमे दिनाङ्के सम्भाव्यते।

**मौखिकपरीक्षा-** लिखितपरीक्षायां 50% अङ्कान् प्राप्तवद्भ्यः मौखिकपरीक्षार्थम् अवसरः दास्यते। मौखिकपरीक्षायां संस्कृतसम्भाषणक्षमतायाः अध्यापनकौशलस्य च परीक्षणं करिष्यते। इयं परीक्षा 01.07.2024 दिनाङ्कतः 06.07.2024 दिनाङ्कपर्यन्तं प्रचलेत्। मौखिकपरीक्षायाः परिणामोद्घोषणं 16.07.2024 तमे दिनाङ्के सम्भाव्यते।

**प्रश्नपत्रस्वरूपम्-** संस्कृतभाषाज्ञानम् आधृत्य शब्दरूपाणि, धातुरूपाणि, सर्वनामानि, संख्या, कृदन्ताः, पूरणप्रत्ययाः, अव्ययानि, कारकम्, वाच्यम्, सन्धिः, समासः इत्यादिविषयकाः प्रश्नाः भवेयुः।

**प्रशिक्षणस्वरूपम्-** मौखिकपरीक्षायां 50% अङ्कान् प्राप्तवद्भ्यः प्रशिक्षणं दास्यते। प्रशिक्षणमिदम् आवासीयं भविष्यति। प्रशिक्षणवर्गम् आगन्तुं गमनागमनव्ययः प्रशिक्षार्थिभिः स्वयं निर्वोढव्यः। प्रतिभागिभ्यः आवासभोजनव्यवस्था विश्वविद्यालयेन प्रशिक्षणस्थाने एव करिष्यते। 01.08.2024 दिनाङ्कतः 23.08.2024 दिनाङ्कं यावत् प्रशिक्षणं सम्भाव्यते। उत्तीर्णैः प्रशिक्षार्थिभिः विश्वविद्यालयेन आयोजयिष्यमाणे एकविंशतिदिवसीये प्रशिक्षणवर्गे पूर्णतया उपस्थितैः भाव्यम्। मध्येप्रशिक्षणं बहिर्गमनं सर्वथा निषिद्धम्।

**प्रशिक्षणस्थानम्-** प्रशिक्षणस्थानं भारते यत्र कुत्रापि भवेत्। प्रशिक्षणस्थानविषये सूचना विश्वविद्यालयस्य जालपुटे प्रकाशयिष्यते।

**विशेषः-** प्रशिक्षणान्ते प्रशिक्षणवर्गे एव पुनः लिखितपरीक्षा मौखिकपरीक्षा च भविष्यति। प्रशिक्षणोत्तरपरीक्षायाम् उत्तीर्णानां वरीयताक्रमेण सूची निर्मास्यते। अपेक्षायां सत्यां ततः चितेभ्यः प्रशिक्षार्थिभ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य **संस्कृताध्ययनकेन्द्रे** (Centre for Sanskrit Learning) **मुक्तस्वाध्यायपीठे** च भाषाशिक्षकरूपेण सूचितम् अध्यापनस्थानं गत्वा कार्यं कर्तुम् अवसरः भवेत्। तदर्थं तेभ्यः संस्कृताध्ययनकेन्द्रस्य व्यवस्थानुसारं प्रतिमासं निर्धारितः मानदेयः (चत्वारिंशत् सहस्रम्) दास्यते।

**आवेदनस्य लिंक-** https://forms.gle/SLKG9GFc8Lixwz5b9

आवेदनार्थं **Scan** क्रियताम्।